# 'ગીતા' અધ્યાય–૧૨ (ભક્તિયોગ)

અર્જુન ઉવાચ

એવં સતતયુક્તા યે ભક્તાસ્ત્વાં પર્યુપાસતે ।

યે ચાપ્યક્ષરમવ્યક્તં તેષાં કે યોગવિત્તમાઃ ।। ૧ ।।

શ્રીભગવાન્ ઉવાચ

મય્યાવેશ્ય મનો યે માં નિત્યયુક્તા ઉપાસતે ।

શ્રદ્ધયા પરયોપેતાસ્તે મે યુક્તતમા મતાઃ ।। ૨ ।।

યે ત્વક્ષરમનિર્દેશ્યમવ્યક્તં પર્યુપાસતે ।

સર્વત્રગમચિન્ત્યં ચ કૂટસ્થમચલં ધ્રુવમ્ ।। ૩ ।।

સન્નિયમ્યેન્દ્રિયગ્રામં સર્વત્ર સમબુદ્ધયઃ ।

તે પ્રાપ્નુવન્તિ મામેવ સર્વભૂતહિતે રતાઃ ।। ૪ ।।

ક્લેશોઽધિકતરસ્તેષામવ્યક્તાસક્તચેતસામ્ ।

અવ્યક્તા હિ ગતિર્દુઃખં દેહવદ્ભિરવાપ્યતે ।। ૫ ।।

યે તુ સર્વાણિ કર્માણિ મયિ સંન્યસ્ય મત્પરાઃ ।

અનન્યેનૈવ યોગેન માં ધ્યાયન્ત ઉપાસતે ।। ૬ ।।

તેષામહં સમુદ્ધર્તા મૃત્યુસંસારસાગરાત્ ।

ભવામિ નચિરાત્પાર્થ મય્યાવેશિતચેતસામ્ ।। ૭ ।।

મય્યેવ મન આધત્સ્વ મયિ બુદ્ધિં નિવેશય ।

નિવસિષ્યસિ મય્યેવ અત ઊર્ધ્વં ન સંશયઃ ।। ૮ ।।

અથ ચિતં સમાધાતું ન શક્નોષિ મયિ સ્થિરમ્ ।

અભ્યાસયોગેન તતો મામિચ્છાપ્તું ધનઞ્જય ।। ૯ ।।

અભ્યાસેઽપ્યસમર્થોઽસિ મત્કર્મપરમો ભવ ।

મદર્થમપિ કર્માણિ કુર્વન્સિદ્ધિમવાપ્સ્યસિ ।। ૧૦ ।।

અથૈતદપ્યશક્તોઽસિ કર્તું મદ્યોગમાશ્રિતઃ ।

સર્વકર્મફલત્યાગં તતઃ કુરુ યતાત્મવાન્ ॥ ૧૧ ॥
શ્રેયો હિ જ્ઞાનમભ્યાસાજ્જ્ઞાનાદ્ધ્યાનં વિશિષ્યતે ।
ધ્યાનાત્કર્મફલત્યાગસ્ત્યાગાચ્છાન્તિરનન્તરમ્ ॥ ૧૨ ॥
અદ્વેષ્ટા સર્વભૂતાનાં મૈત્રઃ કરુણ એવ ચ ।
નિર્મમો નિરહંકારઃ સમદુઃખસુખઃ ક્ષમી ॥ ૧૩ ॥
સન્તુષ્ટઃ સતતં યોગી યતાત્મા દઢનિશ્ચયઃ ।
મય્યર્પિતમનોબુદ્ધિર્યો મદ્ભક્તઃ સ મે પ્રિયઃ ॥ ૧૪ ॥
યસ્માન્નોદ્વિજતે લોકો લોકાન્નોદ્વિજતે ચ યઃ ।
હર્ષામર્ષભયોદ્વેગૈર્મુક્તો યઃ સ ચ મે પ્રિયઃ ॥ ૧૫ ॥
અનપેક્ષઃ શુચિર્દક્ષ ઉદાસીનો ગતવ્યથઃ ।
સર્વારમ્ભપરિત્યાગી યો મદ્ભક્તઃ સ મે પ્રિયઃ ॥ ૧૬ ॥
યો ન હૃષ્યતિ ન દ્વેષ્ટિ ન શોચતિ ન કાઙ્ક્ષતિ ।
શુભાશુભપરિત્યાગી ભક્તિમાન્યઃ સ મે પ્રિયઃ ॥ ૧૭ ॥
સમઃ શત્રૌ ચ મિત્રે ચ તથા માનાપમાનયોઃ ।
શીતોષ્ણસુખદુઃખેષુ સમઃ સંગવિવર્જિતઃ ॥ ૧૮ ॥
તુલ્યનિન્દાસ્તુતિર્મૌની સન્તુષ્ટો યેન કેનચિત્ ।
અનિકેતઃ સ્થિરમતિર્ભક્તિમાન્મે પ્રિયો નરઃ ॥ ૧૯ ॥
યે તુ ધર્મ્યામૃતમિદં યથોક્તં પર્યુપાસતે ।
શ્રદ્દધાના મત્પરમા ભક્તાસ્તેઽતીવ મે પ્રિયાઃ ॥ ૨૦ ॥